শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে কিষ্কিন্ধাকাণ্ডে

# ॥ ষটষষ্টিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ষটষষ্টিতমঃ সর্গঃ ॥

## হনুমদুৎপত্তিকথাং শ্রাৱযিৎৱা জাম্বৱতা সমুদ্রলঙ্ঘনায তস্য প্রোৎসাহনম্

অনেকশতসাহস্ত্রীং ৱিষণ্ণাং হরিৱাহিনীম্।
জাম্বৱান্ সমুদীক্ষ্যৈৱং হনূমন্তমথাব্রৱীৎ॥ **4.66.1** ॥

ৱীর ৱানরলোকস্য সর্ৱশাস্ত্রৱিদাং ৱর।
তূষ্ণীমেকান্তমাশ্রিত্য হনূমন্ কিং ন জল্পসি॥ **4.66.2** ॥

হনূমন্হরিরাজস্য সুগ্রীৱস্য সমো হ্যসি।
রামলক্ষ্মণযোশ্চাপি তেজসা চ বলেন চ॥ **4.66.3** ॥

অরিষ্টনেমিনঃ পুত্রো ৱৈনতেযো মহাবলঃ।
গরুত্মানিৱ ৱিখ্যাত উত্তমঃ সর্ৱপক্ষিণাম্॥ **4.66.4** ॥

বহুশো হি মযা দৃষ্টঃ সাগরে স মহাবলঃ।
ভুজঙ্গানুদ্ধরন্ পক্ষী মহাবাহুর্মহাবলঃ॥ **4.66.5** ॥

পক্ষযোর্যদ্ বলং তস্য ভুজৱীর্যবলং তৱ।
ৱিক্রমশ্চাপি ৱেগশ্চ ন তে তেনাপহীযতে॥ **4.66.6** ॥

বলং বুদ্ধিশ্চ তেজশ্চ সত্ত্বং চ হরিপুঙ্গৱ।
ৱিশিষ্টং সর্ৱভূতেষু কিমাত্মানং ন সজ্জসে॥ **4.66.7** ॥

অপ্সরাঽপ্সরসাং শ্রেষ্ঠা ৱিখ্যাতা পুঞ্জিকস্থলা।
অঞ্জনেতি পরিখ্যাতা পত্নী কেসরিণো হরেঃ ॥ **4.66.8** ॥

ৱিখ্যাতা ত্রিষু লোকেষু রূপেণাপ্রতিমা ভুৱি।
অভিশাপাদভূৎ তাত কপিৎৱে কামরূপিণী ॥ **4.66.9** ॥

দুহিতা ৱানরেন্দ্রস্য কুঞ্জরস্য মহাত্মনঃ।
মানুষং ৱিগ্রহং কৃৎৱা রূপযৌৱনশালিনী ॥ **4.66.10** ॥

ৱিচিত্রমাল্যাভরণা কদাচিৎ ক্ষৌমধারিণী।
অচরৎ পর্ৱতস্যাগ্রে প্রাৱৃডম্বুদসন্নিভে ॥ **4.66.11** ॥

তস্যা ৱস্ত্রং ৱিশালাক্ষ্যাঃ পীতং রক্তদশং শুভম্।
স্থিতাযাঃ পর্ৱতস্যাগ্রে মারুতোঽপাহরচ্ছনৈঃ ॥ **4.66.12** ॥

স দদর্শ ততস্তস্যা ৱৃত্তাৱূরূ সুসংহতৌ।
স্তনৌ চ পীনৌ সহিতৌ সুজাতং চারু চাননম্ ॥ **4.66.13** ॥

তাং বলাদাযতশ্রোণীং তনুমধ্যাং যশস্ৱিনীম্।
দৃষ্ট্ৱৈৱ শুভসর্ৱাঙ্গীং পৱনঃ কামমোহিতঃ ॥ **4.66.14** ॥

স তাং ভুজাভ্যাং দীর্ঘাভ্যাং পর্যষ্ৱজত মারুতঃ।
মন্মথাৱিষ্টসর্ৱাঙ্গো গতাত্মা তামনিন্দিতাম্ ॥ **4.66.15** ॥

সা তু তত্রৈৱ সম্ভ্রান্তা সুৱ্রতা ৱাক্যমব্রৱীৎ।
একপত্নীৱ্রতমিদং কো নাশযিতুমিচ্ছতি ॥ **4.66.16** ॥

অঞ্জনাযা ৱচঃ শ্রুৎৱা মারুতঃ প্রত্যভাষত।
ন ৎৱাং হিংসামি সুশ্রোণি মা ভূৎ তে মনসো ভযম্ ॥ **4.66.17** ॥

মনসাস্মি গতো যৎ ৎৱাং পরিষ্ৱজ্য যশস্ৱিনি।
ৱীর্যৱান্ বুদ্ধিসম্পন্নস্তৱ পুত্রো ভৱিষ্যতি ॥ **4.66.18** ॥

মহাসত্ত্বো মহাতেজা মহাবলপরাক্রমঃ।
লঙ্ঘনে প্লৱনে চৈৱ ভৱিষ্যতি মযা সমঃ॥ **4.66.19** ॥

এৱমুক্তা ততস্তুষ্টা জননী তে মহাকপে।
গুহাযাং ৎৱাং মহাবাহো প্রজজ্ঞে প্লৱগর্ষভ॥ **4.66.20** ॥

অভ্যুত্থিতং ততঃ সূর্যং বালো দৃষ্টৱা মহাৱনে।
ফলং চেতি জিঘৃক্ষুস্ত্ৱমুৎপ্লত্যাভ্যুৎপতো দিৱম্॥ **4.66.21** ॥

শতানি ত্রীণি গৎৱাথ যোজনানাং মহাকপে।
তেজসা তস্য নির্ধূতো ন ৱিষাদং গতস্ততঃ॥ **4.66.22** ॥

ৎৱামপ্যুপগতং তূর্ণমন্তরিক্ষং মহাকপে।
ক্ষিপ্তমিন্দ্রেণ তে ৱজ্রং কোপাৱিষ্টেন তেজসা॥ **4.66.23** ॥

তদা শৈলাগ্রশিখরে ৱামো হনুরভজ্যত।
ততো হি নামধেযং তে হনুমানিতি কীর্তিতম্॥ **4.66.24** ॥

ততস্ত্ৱাং নিহতং দৃষ্টৱা ৱাযুর্গন্ধৱহঃ স্ৱযম্।
ত্রৈলোক্যং ভৃশসঙ্ক্রুদ্ধো ন ৱৱৌ ৱৈ প্রভঞ্জনঃ॥ **4.66.25** ॥

সম্ভ্রান্তাশ্চ সুরাঃ সর্ৱে ত্রৈলোক্যে ক্ষুভিতে সতি।
প্রসাদযন্তি সঙ্ক্রুদ্ধং মারুতং ভুৱনেশ্ৱরাঃ॥ **4.66.26** ॥

প্রসাদিতে চ পৱনে ব্রহ্মা তুভ্যং ৱরং দদৌ।
অশস্ত্রৱধ্যতাং তাত সমরে সত্যৱিক্রম॥ **4.66.27** ॥

ৱজ্রস্য চ নিপাতেন ৱিরুজং ৎৱাং সমীক্ষ্য চ।
সহস্রনেত্রঃ প্রীতাত্মা দদৌ তে ৱরমুত্তমম্॥ **4.66.28** ॥

স্ৱচ্ছন্দতশ্চ মরণং তৱ স্যাদিতি ৱৈ প্রভো।
স ৎৱং কেসরিণঃ পুত্রঃ ক্ষেত্রজো ভীমৱিক্রমঃ॥ **4.66.29** ॥

মারুতস্যৌরসঃ পুত্রস্তেজসা চাপি তৎসমঃ।
ৎৱং হি ৱাযুসুতো ৱৎস প্লৱনে চাপি তৎসমঃ॥ **4.66.30**॥

ৱযমদ্য গতপ্রাণা ভৱানস্মাসু সাম্প্রতম্।
দাক্ষ্যৱিক্রমসম্পন্নঃ কপিরাজ ইৱাপরঃ॥ **4.66.31**॥

ত্রিৱিক্রমে মযা তাত সশৈলৱনকাননা।
ত্রিঃসপ্তকৃৎৱঃ পৃথিৱী পরিক্রান্তা প্রদক্ষিণম্॥ **4.66.32**॥

তথা চৌষধযোঽস্মাভিঃ সঞ্চিতা দেৱশাসনাৎ।
নির্মথ্যমমৃতং যাভিস্তদানীং নো মহদ্বলম্॥ **4.66.33**॥

স ইদানীমহং ৱৃদ্ধঃ পরিহীনপরাক্রমঃ।
সাম্প্রতং কালমস্মাকং ভৱান্ সর্ৱগুণান্ৱিতঃ॥ **4.66.34**॥

তদ্ ৱিজৃম্ভস্ৱ ৱিক্রান্ত প্লৱতামুত্তমো হ্যসি।
ৎৱদ্বীর্যং দ্রষ্টুকামা হি সর্ৱা ৱানরৱাহিনী॥ **4.66.35**॥

উত্তিষ্ঠ হরিশার্দূল লঙ্ঘযস্ৱ মহার্ণৱম্।
পরা হি সর্ৱভূতানাং হনুমন্ যা গতিস্তৱ॥ **4.66.36**॥

ৱিষণ্ণা হরযঃ সর্ৱে হনুমন্ কিমুপেক্ষসে।
ৱিক্রমস্ৱ মহাৱেগ ৱিষ্ণুস্ত্রীন্ ৱিক্রমানিৱ॥ **4.66.37**॥

ততঃ কপীনামৃষভেণ চোদিতঃ
    প্রতীতৱেগঃ পৱনাত্মজঃ কপিঃ।
প্রহর্ষযংস্তাং হরিৱীরৱাহিনীং
    চকার রূপং মহদাত্মনস্তদা॥ **4.66.38**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
কিষ্কিন্ধাকাণ্ডে ষটষষ্টিতমঃ সর্গঃ॥